श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवासुदेवानन्दसरस्वतीविरचितम्

# ॥ मन्त्रात्मकं श्रीमारुतिस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ मन्त्रात्मकं श्रीमारुतिस्तोत्रम् ॥

ओं नमो वायुपुत्राय भीमरूपाय धीमते।
नमस्ते रामदूताय कामरूपाय श्रीमते ॥ 1 ॥

मोहशोकविनाशाय सीताशोकविनाशिने।
भग्नाशोकवनायास्तु दग्धलङ्काय वाग्मिने ॥ 2 ॥

गतिनिर्जितवाताय लक्ष्मणप्राणदाय च।
वनौकसां वरिष्ठाय वशिने वनवासिने ॥ 3 ॥

तत्त्वज्ञानसुधासिन्धुनिमग्नाय महीयसे।
आञ्जनेयाय शूराय सुग्रीवसचिवाय ते ॥ 4 ॥

जन्ममृत्युभयघ्नाय सर्वक्लेशहराय च।
नेदिष्ठाय प्रेतभूतपिशाचभयहारिणे ॥ 5 ॥

यातनानाशनायास्तु नमो मर्कटरूपिणे।
यक्षराक्षसशार्दूलसर्पवृश्चिकभीहृते ॥ 6 ॥

महाबलाय वीराय चिरञ्जीविन उद्धते।
हारिणे वज्रदेहाय चोल्लङ्घितमहाब्धये ॥ 7 ॥

बलिनामग्रगण्याय नमो नः पाहि मारुते।
लाभदोऽसि त्वमेवाशु हनुमान् राक्षसान्तक ॥ 8 ॥

यशो जयं च मे देहि शत्रून् नाशय नाशय।
स्वाश्रितानामभयदं य एवं स्तौति मारुतिम्।
हानिः कुतो भवेत्तस्य सर्वत्र विजयी भवेत्॥ 9॥

॥ मन्त्रात्मकं श्रीमारुतिस्तोत्रं समाप्तम्॥